Journal of Advances and Scholarly Researches in Allied Education

Vol. IV, Issue VII, July-2012, ISSN 2230-7540

REVIEW ARTICLE

‘श्रीकृष्णवल्लभाचार्यानुसारेण योगदर्शनस्य महत्वम्’

www.ignited.in

Journal of Advances and Scholarly Researches in Allied Education
Vol. IV, Issue VII, July-2012, ISSN 2230-7540

‘श्रीकृष्णवल्लभाचार्यानुसारेण योगदर्शनस्य महत्वम्’

Parveen Kumar

Lect. in D.A.V College, Sadhaura, Yamunanagar, (Haryana)

---------------------------♦-----------------------------

अस्माकं भारतीय परम्परायां आस्तिकनास्तिकभेदेन नव दर्शनानि प्रचलितानि सन्ति। विबुधै ः त्राीणि नास्तिक षडास्तिकसंज्ञितानि। भरतीयसाहित्ये दर्शनशास्त्रास्य वैशिष्ट्यमस्ति बृहत्तरम्। तत् किं नाम दर्शनम्? ‘दृश्यते{नेनेतिदर्शनम्’ अथवा रहस्यमयस्य निगुढतमस्य प्रप×चस्य समाधनपथदर्शकं शास्त्रामिदं किल दर्शनमित्यभिध्ीयते। महर्षिणां दिव्यचक्षुषां साक्षात्कृतध्र्मणां तपोनिष्ठबुऽया सत्यभुततत्वमालोचनपरं ज्ञावमेव दर्शनम्। जन्मतः मनुष्यः मरणशीलः एव मत्वा कर्मणि सीव्यतीति निरुक्तेः। यदा कदा सः चिन्तनं करोति को{हं? कुतो{हं? कस्माद{हं? इत्यादीन् गुढप्रश्नान्। गुढप्रश्नचिन्तनमननपरिणतिभूतमेवेदं दर्शनशास्त्राम्। उक्त×च ‘आत्मावा{रे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति।’

भारतीयदर्शनस्याधररूपमवधर्यतेमीहर्षियाज्ञवल्कयस्यायमुपदेशः। मनुष्यजीवनस्य परमोद्देश्यमात्मसाक्षात्कारेवास्ति। स च श्रवण-मनन-निदध्यासेनैव सम्भवति नान्यथा। उक्त×च-

श्रोतव्यो श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।

मत्वा तु सततं ध्येयः एते दर्शन हेतवः।।

वेदमूलकमेव भारतीयदर्शनमस्ति। वेदस्योपबंृहणार्थमेव दर्शनस्य प्रवृत्तिरस्ति। वेद साहित्यं न केवलं भारतीयदर्शनस्य जन्मस्थानमपितु सर्वसाहित्यस्य पूर्णतादायकमप्यस्ति। वेदेष्वेव भारतीयदर्शनिकता परिपूर्णतया निसृताः। अस्मात् कारणात् आस्तिकं षडदर्शनं तु वेदस्य उपाडöभूतमस्ति। तत्रा चार्वाक-बौध्-जैनाः नास्तिकाः कथ्यन्ते यतो हि ते वेदप्रामाणिकतां ना स्वीकुर्वन्ति। नास्तिकास्तिकरूपेण एकमेव दर्शनशास्त्रां द्वैविध्यं प्रसिध्यति। पर×च अपवर्ग प्रप्तिस्तु सर्वेषामेव भारतीयदर्शनानां परमोध्येयो{स्ति।

मुक्ति साध्नानि अनेकानि शास्त्रोषु विद्यन्ते। यथा- साख्यमते तत्त्वज्ञानमेव, वेदान्तमते ब्रह्मज्ञानमेव, मीमांसकमते कर्मकलाप एव, न्यायवैशेषिकमते पदार्थज्ञानमेव, नारदादिमते भक्तिरेवेत्यादीनि, तथपि तानि साध्नानि त्वेतन्मते गौणीभूतानि। योगशास्त्रामेव तु प्रधनरूपेण मुक्दिायकमस्ति।

युजसमाधै, अनुशिष्यते व्याख्यायते इति योगः। निर्मलसत्त्वगुणपरिणामरूपस्य चित्तस्य वृत्तीनां वहिर्मुखपरिणति विच्छेदाद् अन्तर्मुखतया प्रतिलोमपरिणामेन स्वकारणे चित्ते लयो योग इत्युच्यते। चतुर्षु भागेषु विभक्तमस्ति योगमपि लययोग, हठयोग, मन्त्रायोग, राजयोगभेदेन च। योगेनैव मानवस्य चित्तं निर्मलं शुऽ स्थिर×च भवितुमर्हति। योगः सार्वभौमध्र्मो{स्ति। सम्यग्दर्शनाभ्युपायो हि योगो वेदे विहितः।

योगपरम्परायाः ज्ञानमपि अपेक्षितम्। योगदर्शनस्यारम्भः हिरण्यगर्भादभवत्। यथा-

‘हिरण्यगर्भो योगस्य वक्ता नान्य पुरातन’।

अतः हिरण्यगर्भादेव योगस्यावतरणं मन्यते। याज्ञवल्क्यद्दषिणानुसारेण अयमेव आदिवक्ता इत्युद्घोषितम्। यद्यपि संहिताब्राह्मणोपनिषदादिषु ग्रन्थेषु योगस्योल्लेखं वर्णनं च विद्यते। तथापि काले प्रणष्टं भगवान् पत×जलिरूज्जहारेति योगदर्शनस्य पात×जलदशनाभिध्ेयत्वं। यथोक्तं गीतायां भगवता-

इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।

विवस्वान् मनवे प्राह मनुरिक्ष्वाकवे{ब्रवीत।।

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः।

स कालेनेह महता योगोनष्टः परन्तपः।।

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः।।

'अत एव पुराणादौ योगस्य विप्रकीर्णतया विशिष्य दुर्गाहयार्थत्वं दयासिन्ध्ुना पफणिपतिना सारं स×ि्ज्जघृक्ष्ुणा अनुशासनम् आरब्ध्म् न तु साक्षात् शासनम्।'

पत×जलिनाम्ना बहवः प्रसिsाः ग्रन्थकाराः वभूव। पर×च योगसूत्राकर्तु पत×जलेः तेषां केनाप्यभेदो भेदो वेति नाद्य यावन्निश्चितम्। भरतीयपरम्परानुसारेण योगसूत्रारचयिता तथा महाभाष्यरचयिता पत×जलिमुनिः एक एवास्ति। यथा-

योगेन चित्तस्य पदेन वाचां,

मलं शरीरस्य च वैद्यकेन।

यो{पाकरोत तं प्रवरं मुनीनां,

पत×जलिं प्रा×जलिरानतो{स्मि।।

रचनाकालविषये{पि आलोचकानां मतैक्यनास्ति। केचन् मन्यन्ते ईसापूर्वीये प्रथमे द्वितीये वा शतके योगसूत्रास्य रचनां वभुव। केचन् मन्यन्ते ईस्वीय प्रथम शतके योगसूत्राणि रचितानि सन्ति। संशयारूढमस्ति रचनाकालविषयः।

योगसूत्रास्योपरि बहवः टीकाः सन्ति। मुख्यरूपेण सर्वप्रसिsं व्यासभाष्यमस्ति अनन्तरं च वाचस्पतिमिश्र प्रणीता तत्वविशारदीनाम्नी भाष्यटीका, विज्ञानभिक्षुप्रणीतं योगवार्तिकं भाष्यव्याख्यानम्।

भाष्यातिरिक्तटीकासु भोजदेवकृतराजमार्तण्डवृत्तिः भावागणेशकृतयोगसूत्रादीपिका

रामानन्दस्य मणिप्रभा, नारायणतीर्थस्य योगचन्द्रिका, शंकरकृतविवरणम्, यशोविजयसुरेवृत्तिः, नागेशस्यवृत्तिः प्रकाशिता सन्ति।

योगसूत्रोपरि श्रीकृष्णवल्लभाचार्यस्य भाष्यमस्ति स्वामिनारायणभाष्य। अतः योगनये ये सिsान्ताः प्रतिपादिता सन्ति तस्यैव विवेचनमत्रावर्तते। तथापि स्वामिनारायणभाष्ययप्रतिपादनशैली भिन्ना वर्तते। अतः योगसिsान्तानां नूतनसरणिमाश्रित्य प्रतिपादनमस्मिन् भाष्ये विद्यते अनेन प्रकारेण प्रतीयते यत् स्वामिनारायणभाष्ये योगस्य नूतनाः सिsान्ताः अपि सन्ति।

पात×जलयोगदर्शनं समाध्-िसाध्न-विभूति-कैवल्यभेदेन चतुर्षुभागेषु विभक्तमस्ति। विभिन्नयोगाना×च विवेचनमत्रौव कृतमस्ति। तत्रा 'अथ योगानुशासनम्' इति सूत्रोण प्रथमपादस्य आरम्भोभवति अथ शब्दः स्वरूपेण मडõलभूतः तदुच्चारणमपिमडõलभूतम्। अनन्तरं योगस्य लक्षणमुच्यते- 'योगश्चित्तवृत्तिनिरोधः' इति योगो नाम समाध्ि। निरोधे नाम स्वकारणेलयः, चित्तं नाम महत्वम् बुsिरेवेति, तथा च यावतीनां बुsिवृत्तीनां सात्विकीनां राजसीनां तामसीनां प्रमाणविपर्ययविकल्पनिद्रास्मृत्यभिधनां स्वकारणे बुsितत्वे तावदात्यन्तिको लयः योग इत्युच्यते।

बुsिवृत्तीनां लयो हि तदैव भवति यदा बुsौ बीजभावस्तत्वज्ञानाग्निना दग्धः स्यात्, अपरयोगिनामपि यावत् स्थूलशरीरस्थितिस्तावत्सूक्ष्मशरीरस्यापि सत्वेनात्मबुsौः संयोगस्यापि विद्यमानत्वम्, एव×च सति बुsौ प्रतिविम्बमपि चेतनस्य सम्भवत्येव। तत्रा च बुsिध्र्मा अवश्यं संक्रान्ता विद्यन्ते। बुsि संयोग सत्वेsपि तत्रा ज्ञानाग्निना दग्ध्बीजभावत्वाsवध्किस्तावदपरो योग इति।

अपि च 'अथ तत्वदर्शनाभ्युपायोयोगः' सम्यकरूपेणदर्शनाभ्युपायत्वेनैव योगोsडõीक्रियते योगशास्त्रोsपि। योगमार्गेण एव निःश्रेयसमध्गिम्यते सांख्यज्ञानेन, वेदज्ञानेन वा। श्रुतिनामपि प्रतिपाद्यते- 'त्वमेवविदित्वा अति मृत्युमेति नान्यः पन्था विद्यतेsयनाय'

आत्मज्ञानमेव मुक्तिकारणम् इत्युद्घोषितम् विपत्तिमूलज्ञानमेवास्ति। आङõल साहित्यकारेsपि प्रतिपादितम्- 'ज्ीमतम पे दव कंतादमे्े इनज पहदवतंदबमण्' अर्थात अज्ञानमेव तमोsस्ति। अज्ञानवारणाय तथा च स्वानुभूतिप्रकाशनाय योगस्यावश्यक्ताsस्ति। आत्मदर्शनं न तु अनुमित्या सम्भवति नहि शास्त्राश्रवणेन च यथोक्तं योगवसिष्ठे-

नात्मास्त्यनुमया राम न चाप्तवचनादिना।

सर्वदा सर्वथासर्वं स प्रत्यक्षोsनुभूतितः।।

इदमेव योगशास्त्रास्य परमं प्रयोजनम्।
अष्टावक्रगीतायामपि कथितमस्ति-

न पृथिवी न जलं नाग्निर्न वायुद्यौर्न वा भवान।

एषां साक्षित्रायात्मानं चिद्रूपं विsि मुक्तये।।

योगस्योपादेयता सर्वेषां जनानां कृते अतुलनीयमस्ति। योगाचार्याणां मुक्तिं प्रति मुख्यकारणस्य योगस्यैवावध्ेयत्वात् 'ऋते ज्ञानान्न मुक्ति' रित्यादिना ज्ञानस्य तु सहकारिताया कारणत्वं निर्वहनीयम्। ज्ञानस्य

योगजसमाध्द्विारा मुक्तिप्रयोजकत्वं बोध्यम्, सर्वाऽपि ज्ञानस्य मुक्तिकारणत्वबोध्किाः श्रुतिस्मृत्यस्थैवोपनेयाः।

चित्तशब्देनान्तःकरणं बुऽिमुपलक्षयति। न हि कूटस्थ नित्या चितिशक्ति परिणामिनी ज्ञानध्र्मा भवितुमर्हति, बुऽिस्तु भवेदिति भावः। क्षिप्तं, मुढं, विक्षिप्तं, एकाग्रं, निरूऽम्, इति चित्तभूमयः। संस्कारवशात् यस्यामवस्थायां चित्तं सन्तिष्ठते सा चित्तभूमिः।

चित्तं हि कदाचित्क्षिप्तं कदाचिन्मूढं कदाचिद्विक्षिप्तं कदाचिदेकाग्रं कदाचिद्विरूऽमिति प×चवृत्तिकम्। यदा चित्तस्य केनापि विषयेण सह सानिध्यं भवति, तदा तत् तस्यैव विषयस्याकारं विभर्ति। क्षिप्तं सदैव रजसा तेषु तेषु विषयेषु क्षिपयमाणमत्यन्तमस्थिरम्। मूढं तु तमः समुद्रेकान्निद्रावृत्तिमत् क्षिप्ताद्विशिष्टं विक्षिप्तम्। एकाग्रमेकतानम्। निरूऽं सकलवृत्तिकसंस्कारमात्राशेष चित्तं निरूऽम्।

योगदर्शने स्वामिनारायणभाष्ये प्रतिपादितमस्ति यत् क्षिप्तं, मूढं क्षिप्तावस्थचित्तवृत्तीनां नाशेन एकाग्रावस्थायां सम्प्रज्ञातसमाधिं निरूऽावस्थायां चाऽसम्प्रज्ञातसमाधिं प्राप्य परमं कैवल्यं विन्दते योगीति विषयः। सर्वैः साध्योमोक्षः स च योगशास्त्रा मते दुःखत्रायाऽत्यन्ताभावविशिष्टा या परमात्मस्वरूपशरणवाप्तिस्दात्मकः।

यद्यपि परमात्मस्वरूपदर्शनरूपावाप्तिस्तु योगिनां संसारदशायामपि स्वहृदिसमाध्निा सम्भवति, तथापि न सा परमा मुक्तिः यतः समाध्यवस्थायां दुःखकारणात्मिकाया मायायाः सूक्ष्मसंसर्गस्य सत्वेन तिरोभूत-स्वभावंकारणात्मकमपि दुःखत्रायं संसृष्टमेवाऽऽत्मनीति भवितुमर्हति, समाध्यानन्तरं पुनस्तेषामेव योगिनां मायोपाध्यादिदर्शनात् तदा जीवनमुक्तिस्तु सम्भवत्येव।

सम्प्रज्ञातअसम्प्रज्ञातभेदेन योगः द्विविधे भवति। सर्वासां वृत्तीनामनिरोधे अर्थात कासा×िचद् वृत्तीनां निरोधे कासा×िचच्चानिरोधे, अर्थात यत्रा ‘ध्याता ध्यानं ध्येयम्’ अथवा ‘ज्ञाता ज्ञानं ज्ञेयम् ’ इति च त्रिपुट्यवस्थायां भवति तदा तत्रा सम्प्रज्ञातो योगः भवति। यत्रा च सर्वासां वृत्तिनां निरोधः तत्रा असम्प्रज्ञातो योगः भवति। अर्थात यदा सर्वासां वृत्तिनां निरोधत् किमपि लौकिकं ज्ञानं न भवति तदा असम्प्रज्ञातयोग इति कथ्यते।

योगशास्त्रो सम्प्रज्ञातः असम्प्रज्ञातः इत्युभयविधेऽपि योग संगृहीतोऽस्ति। योगः, चित्तवृत्तिनिरोधः, समाधिरिति त्रायोऽपि शब्दाः परस्परं पर्यायवाचकाः। योग शब्देन च सम्प्रज्ञातः असम्प्रज्ञातश्चेत्युभयविध्समाधिर्गृह्यते। यदा चित्तनिरोध्संस्कारयुक्तं भवति तदा निर्बीज समाधिर्भवति, स च असम्प्रज्ञात इति नामकः समाधिर्भवति। एकाग्रे चित्तेऽविद्याऽस्मितारागद्वेषाऽभिनिवेशात्मकाः क्लेशाः क्षयं पारप्ताः कारणत्मकाः सूक्ष्मा भवन्ति, कर्माणि जात्यायुर्भोगप्रदानि ध्र्माऽध्र्मात्मकान्यपि क्षीणानि कारणात्मकानि लयं गतानीव भवन्ति, ते क्लेशाः कर्माणि च बीजभावतयाऽवतिष्ठन्ते, ननु जात्यायुर्भोगात्मकानि नवान्यङ्कुराणि प्रसुवते। अतः सबीजसमाधिरिति ख्यायते। सः एव सम्प्रज्ञातयोग इति ख्यायते। अर्थात यदा प×चक्लेशाः सूक्ष्मा भवन्ति तदा सबीजसमाधिर्भवति। सबीज समाधे एकाग्रे चित्ते एव चत्वारो भेदा विद्यन्ते। यथा- सवितर्कसम्प्रज्ञातः, सविचारसम्प्रज्ञातः, सानन्दसम्प्रज्ञातः, सास्मितसम्प्रज्ञातश्चेति। अतः समाधिः सविकल्पं निर्विकल्प×च, सबीजं निर्बीज×च, सम्प्रज्ञातमसम्प्रज्ञात×च विविध्रूपेण इति कथ्यते।

योगदर्शनस्य सेश्वर सांख्यमिति संज्ञया समाख्यायते। ईश्वरो जीवः प्रकृतिश्चेति तत्त्वत्रायवादमनुगृहणाति दर्शनमिदं। तस्मात् कारणात् सेश्वरसांख्यमिति कथ्यते। योगदर्शने तु षडविंशति तत्वानि विद्यन्ते ईश्वरसहितम्। यद्यपि सांख्यदर्शने प×चविंशति तत्वानि निरूप्यन्ते। यथा सोख्यकारिकायां-

मूलप्रकृतिर्विकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।

षोडषस्तु विकारो प्रकृतिर्नविकृतिः पुरूषः।।

तत्रा तावद् एका मूल प्रकृतिः प्रकृतिविकृतयश्च सप्तमहद्तत्त्वमहंका- रप×चतन्मात्रारूपेण, षोडषकेवलाः विकृतयः, मनसतत्त्वसहितं दशैन्द्रियप×चमहाभूतम्, प्रकृति विकृति भिन्नोऽनुभयात्मकपुरूषश्चैक इति प×चविंशतितत्वानि सांख्ये निरूपयन्ते। योगदर्शने षडविशति तत्वानि सन्ति ईश्वरविशेषसहितम्। यथा- ‘ईश्वर प्रणिधनाद्वा’

अनेन प्रकारेण ईश्वरमनुर्गृाति योगदर्शनम्। निर्विकल्पसमाध्लािभाय ईश्वरप्रणिधनमपि प्रमुखोपायो वर्तते। प्रणिधनाद्भक्तिविशेषान्मानसाद्वाचिकात्का- यिकाद्वाऽऽवर्जितोऽभिमुखी कृतस्तमनुर्गृाति।

परमेश्वरविषयकस्नेहाऽतिशयो भक्तिः तथा च शाण्डिल्यसूत्रो-'सा पराऽनुरक्तिरीश्वरे'

चित्तस्य द्रवीभावं बिना या भक्तिस्तस्याः भक्त्याभासत्वम्। स्वामिसेवकभावयोर्भगवद्भक्तयोः क्षणमात्रामपि तत्स्मरणविरहाऽसहिष्णुताप्रीतिः भक्तिरिति कथ्यते। द्रवीभावो नाम स्नेहस्य पराकाष्ठात्मकपरिणामः। श्रीमद्भागवते प्रेमलक्षणभक्तिः नवध प्रकीर्तिता-

श्रवणं कीर्तनं विष्णो स्मरणं पादसेवनम्।

अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।।

प्रेमलक्षणभक्ति अनुष्ीयमाना सती द्रागेव भगवच्चरणारविन्द-सेवालाभदायिनी भवति। भक्त्या हि तुष्टो भगवान भक्तानाम्। भगवतपादश्रीमच्छड्कराचर्येणोक्तम्-

'मोक्षकारणसामग्रयां भक्तिरेव गरीयसी।'

श्रीमद्भगवद्गीतायां स्वयमेव भगवता निगदितम्-

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।

तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।

व्यासदृष्ट्या सर्वक्रियाणां परमगुरावर्पणम् समग्रकर्माणं पफलत्यागो वा भक्तिरभिध्ीयते। यस्मात् क्षणादारभ्यते भक्तिस्तदक्षणादेव चित्तवृत्तयश्चित्तमलाश्च क्रमशो लयाभिमुख्यं गच्छन्ति, यथा यथा भक्तिभूमिः विवधर्ते तथा तथा चित्तं निर्मलं जायते। तेन सम्प्रज्ञातसमाध्लािभः परमवैराग्यश्चेति।

'तस्य वाचकः प्रणवः'

तस्य परमेश्वरस्य वाचकः प्रणवः ऊॅफकार इति। अत्रोदं बोध्यं मुख्य एवायं प्रणवः परमेश्वरवाचक इति। 'परमेश्वर' इति शब्दोऽपि तस्य वाचको भवति। यस्य भक्तस्य स्नेहपराकाष्ठा यत्रा यत्रा भगवदभिधनविशेषे हरिः, रामः, कृष्णः, परमेश्वरः विशेषे वा भवति तत् तत् नामोच्चारणभक्त्या तस्य तस्य परममुक्तिः प्राप्तिरपि भवति।

ओंकारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः।

कामदं मोक्षद× चैव ओंकाराय नमो नमः।।

प्रणवस्य जपेन योगिनश्चित्तं परमात्मस्वरूपे एकाग्रं भवति। ततः परमेश्वरैकशरणं योगिनं परमेश्वरः समाध्तित्पफललाभेन अनुर्गृाति इति। तस्मात् कारणात् योगदर्शने कथितमाह-

'तज्जस्तदर्थभावनम्'

अनवरतं प्रणवजपेन प्रणवार्थं स्वचेतसि निवेशाच्च योगिनश्चित्तं परमात्मस्वरूपे एकाग्रं भवति। अर्थानुसंधनपूर्वकं भगवन्नाम जपाद्भगवतः

दर्शनं भवति। परमेश्वरवाचकशब्दानां जपस्मरणादिकं सर्वथैव मुक्तिदमिति। मन्त्राजपविध्रिपि उक्तः पराशरेण-

स्नातः शुचिर्धैतवासा पीठे औणार्दिके शुचौ।

स्वस्तिकेनाऽऽसनेनैव निषद्य स्थिरमानसः।।

मौनी जपेन्मन्त्राराजं तदर्थं हृदि भावयन्।

उपांशु तु जपं कुर्यात् कुर्याद्वा मानसं शनैः।।

विवृतोष्ठ उपंाशुः स्यादचलोष्ठस्तु मानसः।

न च कम्पन् नोपहसन् न पार्श्वमलोकयन्।।

नऽन्यासक्तो न जल्पॅस्तु नाऽप्रावृतशिरास्तथा।

न पदा पादामक्रम्य चालयन्न करं जपेदिति।।

अनेन प्रकारेण पराशरेण जपविध्ि निर्दिष्टम्। भगवन्नाम जपस्य महिमा विष्णुध्र्मोत्तरपुराणेऽपि वर्णितमस्ति। यथा-

अध्ीताः सकलाः वेदाः साडõोपाडõा हि तेन तु।

भगवन्नामपि येनात्रा जप्तं सर्वार्थसिऽिदम्।।

भगवान्नाममन्त्राजपपफलयुक्तं पुराणेषु भक्तिपरकग्रन्थेषु तथाश्च गरिमामयमहिमा वर्णिताऽस्ति। परमेश्वरस्य नाममन्त्राजपादिकमाचरणीयम् समाध्लािभाय। ईश्वरस्य स्वरूपमुपयोगो गरिमा च सुगमतया अवगन्तुं शक्यते स्वामिनारायणभाष्ये योगदर्शने नित्यः, सर्वज्ञः, सर्वाध्किज्ञानशक्तिसम्पन्नः, सर्वव्यापि, क्लेशकर्मविपाकाशयरहितः, पुरूषविशेषः ईश्वर इति परिभाषितः। तथाहि प्रकृतिपूरू- षव्यतिरिक्तमीश्वरमुद्घोषयन् पत×जलिः-

'क्लेषकर्मविपाकाशयैरपरामृष्टः पुरूषविशेषः ईश्वरः।'

अनेन सूत्रोण बऽमुक्तप्रकृतिलीनपुरूषेभ्यो विशिष्टः पुरूषविशेषः ईश्वर इति कथ्यते।

'अविद्या{स्मितारागद्वेषाभिनिवेषाः क्लेषाः'

अविद्यादयः क्लेषाः, कुशलाकुशलानि कर्माणि तत्पफलं विपाकः तदनुगुणा वासना आशयाः। ते च मनसि वर्तमानाः पुरूषे व्ययदिश्यन्ते स हि तत्पफलस्य भोक्तेति। योगेनापरामृष्टः स पुरूषविशेष ईश्वरः। गीतायामुक्तं भगवता-

यो मां पश्यति सर्वत्रा सर्वं च मयि पश्यति।

तस्याहं न प्रणश्यामि स च मे न प्रणश्यति।।

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्।

विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति।।

ईश्वरस्वरूपं योगनये विशेषरूपेण प्रतिपादितमस्ति। मुक्तपुरूषाः प्रकृतिलीनाश्च न कथमपीश्वरपदवीमारोढुं शक्नुवन्ति, यतो हि ते प्राकृतिक-वैकारिक-दाक्षणिकबन्ध्नानि छित्वा कैवल्यमुपलब्ध्वन्तः। मोक्षपुरूषाणां यद्यप्युत्तरकाले बन्ध्नं नास्ति तथापि ते{वश्यं मुक्तावस्थातः प्राग् बन्धः आसन् एव×च तत्त्ववैशारद्यां-

पूर्णशतसहस्रन्तु तिष्ठन्त्यव्यक्तचिन्तकाः।

पुरूषं निर्गुणं प्राप्य काल संख्या न विद्यते।

सांख्यसूत्रो प्रकृतिलक्षणमपि प्रतिपादितम् कपिलमहोदयेन-

'सत्वरजस्तमसां साम्यवस्था प्रकृति'

अत्रा सत्वरजस्तमांसि द्रव्याणि प्रकृतिस्वरूपधयकानि विज्ञेयानि। तेषां संयोगविभागलघुत्वगरूत्वादिगुणवत्त्वस्य वक्ष्यमाणत्वात्। तेषां सत्वरजस्तमसां या अन्न्यूनाितिरिक्ता च संहतावस्था अकार्यानुकूला सैव प्रकृतिरिति। वस्तुतस्तु-अकार्यावस्थोपलक्षितं गुणसामान्यं प्रकृतिरिति लक्षणं योग्यम्।

अत्रा लक्षणे या साम्यावस्था वर्तते तस्या एव ग्रहणे वैशम्यावस्थायां प्रकृतिनाशापत्तिर्भवति। अतः साम्यावस्था{त्रोपलक्षणरूपैवेति ज्ञेयम्। तदुक्तं तेषां सत्वादिद्रव्याणां या साम्यावस्था अन्न्यूनातिरिक्तावस्था न्यूनाध्किभावेनासंहतावस्थेति यावत्, अकार्यावस्थेति निष्कर्षः, अकार्यावस्थोपलक्षितं गुणसामान्यं प्रकृतिरिति, यथा श्रुते वैषम्यावस्थायां प्रकृतिनाशप्रसडõात।

सांख्यतत्त्वयथार्थदीपेन चोक्तं यथा- 'साम्यवस्थोपलक्षिता गुणाः प्रकृतिरित्येकं लक्षणं च अकार्यागुणा इत्यपरम् सूक्ष्ममलिडõमचेतनमनादिनिध्नम् तथा प्रसवर्ध्मिनिरवयवमेकमेव साधरणमेतदव्यक्तमिति प्रकृलिक्षणम्' इति तत्त्वसमाससुत्रावृत्तौ निर्दिष्टमस्ति। प्रकृते वर्णनं कृत्वा प्रमाणस्य वैशिष्ट्यं योगशास्त्रानुसारेण प्रतिपाद्यते। प्रमाणत्रायं स्वीकुर्वन्ति योगाचार्यैः, सांख्याचार्यैरपि प्रमाणत्रायमडõीकृतानि। दृष्ट ;प्रत्यक्षद्ध- अनुमान- आप्तवचनान्येव। यथा प्रतिपादितम्-

'तत्रा प्रत्यक्षानुमानागमाः प्रमाणनि'

इन्द्रियप्रणालिकया विषयदेशगता यावन्त्यो बुऽिवृत्तयो विषयाकारपरिणताः सन्त्यो विषयमादाय परावृत्तास्ता बुऽिगतं यच्चैतन्यप्रतिविम्बं तत्रा संक्रममाणा भवन्ति, तदा पुरूषस्ततदाकारानुरक्तो भवति, तादृशवृत्यात्मको बोध्ः पौरूषेयः पफलं प्रमा इति। प्रमा चैतन्यमते ऽिविध, बुऽिवृत्तिः पौरूषेयबोध्श्चेति। तादृश प्रमायाः करणं प्रमाणं, तदपि द्विविध्े इद्रियादयो बुऽिवृत्तिश्चेति।

इन्द्रिय प्रणालिकया चित्तस्य बाह्यवस्तूपरागात् तद्विषयः सामान्यविशेषात्मनो{र्थस्य विशेषावधरणप्रधनावृत्तिः प्रत्यक्षं प्रमाणं।

अनुमेयस्य तुल्यजातीयेष्वनुवृत्तो भिन्नजातीयेभ्यो व्यावृतः सम्बन्धे यस्तदविषया समान्यावधरणप्रधना वृत्तिरनुमानम्

आप्तेन दृष्टो{नुमितो वार्थः परत्रा स्वबोध्संक्रान्तये शब्देनोपदिश्यते, शब्दात्तदर्थविषया वृत्तिः श्रोतुरागमः यस्या श्रऽेयार्थो वक्ता न दृष्टानुमितार्थः, स आगमः प्लवते, मूलवक्तरि तु दृष्टानुमितार्थे निर्विप्लवः स्यात्। त्रिविधं प्रमाणं योगशास्त्रामतमिति।

त्रिषु प्रमाणेषु अन्यदर्शनस्वीकृतानां सर्वेषां प्रमाणानां अन्तर्भावः गृह्यते श्रीकृष्णवल्लभाचार्यः योगसुत्राकारः।

अष्टयोगाडõानि विनिर्दिष्टानि योगसूत्राकारेण। यम नियमासन प्राणयाहार धरणा ध्यान समाध्यश्च। यम नियमादिन् परिपालयन् साध्कः कथमिव समाध्पिथमनुसरति, इत्यस्य विशदं विवेचनं विध्ीयते योगदर्शने। योगाडõरूपेण प्रकीर्तिता तथाश्च योगाडõानूष्ठानादेव विवकेख्याति

स×जायते सैव मुक्ति कैवल्यं केवलीभाव इति वा। इदमेव योगशास्त्रास्य परमं प्रयोजनम्। यथा- 'योगाडõानुष्ठानादशुsि क्षये ज्ञानदीप्तिराविवेकख्यातेः'

योगाडõानुष्ठानादेव प×चपर्वणो विपर्यस्याशुsिरूपस्य क्षयोनाशः तत्क्षये सम्यग्ज्ञानस्याभिव्यक्तिः। यथा यथा साध्नान्यनुष्ठीयन्ते तथाऽशुsि स्तनुतां प्रप्नोति,यथा यथा चाशुsिक्षीयते तथा तथा ज्ञानस्य दिप्तिः आविवेक ख्यातेः सत्वपुरूषाऽन्यताख्यातिपर्यन्तं विवध्र्ते, तथा च योगाडõõानुष्ठानम्, अविद्याक्षयस्य कारणं तत्त्वज्ञानस्य चोपपत्तिकारणं तत्त्वज्ञानद्वारा विवकेख्यातेः प्रप्तिकारणमिति।
'यमनियमासनप्राणायामप्रत्याहारधरणाध्यानसमाध्योऽष्टावडõानि।'

तत्रा यमाः प×चाभिधस्यमानाः, नियमाऽपि प×चवक्ष्यमाणाः, आसनानि चतुराशीतिसंख्यकानिवक्ष्यन्ते, प्राणायामः त्रिध वक्ष्यमाणाः, प्रत्याहारः इन्द्रियादिकरणानां या वृत्तयस्तासां विषयेभ्य व्यावृत्तिः इन्द्रियेषु तद्वृत्तीनां व्यवस्थापनमिति यावत्, धरणा धार्यं स्थूलसूक्ष्मादिकमपि विषयस्वरूपं करणवृत्तिषु यत् सा, ध्यानं - ध्यायते स्थूलसूक्ष्मादियत्किमपि स्वरूपं यत्रा वृत्तिषु तत्, समाध्ि- सम्यगाध्ीयते ध्येयं यत्रा वृत्तौ सः, इत्येतान्यष्टाडõानि योगस्य सन्तीति। अनेन प्रकारेण सम्यकतया योगाडõानुष्ठानेन कैवल्य, मोक्षप्राप्तिर्भवति समाध्र्भिवति। कैवल्यप्रप्तिरेव योगदर्शनस्य प्रयोजनम्। भगवत् शंकरमहोदयेन प्रतिपादितमनेन प्रकारेण- 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय'।

परमपुरूषमतिरिक्तं नास्ति कोऽपि उपासनीयम्। कैवल्योपनिषदि मोक्षस्य कारणं ब्रहमज्ञानमेवास्ति। यथा-

स एव सर्वं यदभूतं यच्चभव्यं सनातनं।

ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये।।

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।

संपश्यन् ब्रहमपरमं याति नान्येन हेतुना।।

शंकराचार्यानुसारेण मोक्षस्योपाय कर्मकाण्डोपासना,सांख्ययोगादिकं नास्ति केवलं ज्ञानमिति मन्यते। पर×च पत×जलिमुनि अस्मिन् विषये जानन्ति स्मः तथापि निगदितं यत् 'योगश्चित्तवृत्तिनिरोध्ः' चित्तवृत्तिनां निरोध्ः एव योगः नास्ति मोक्षः। योगं विना ज्ञानं नैव भवितुं शक्नोति । योगबीजे ईश्वरेण भणितम्-

देवी उवाच-

ज्ञानादेव हि मोक्षं वदन्ति ज्ञानिनः सदा।

न कथं योगसिsेन, योग किं मोक्षदा भवेत्।।

ईश्वर उवाच-

ज्ञानेनैव हि मोक्षोहि तेषां वाक्यं तु नान्यथा।

सर्वं वदन्ति खडगेन जयो भवति तर्हि किम्।।

बिना युsेन वीर्येण कथं जयमाप्नुयात्।

तथा योगेन रहितं ज्ञानं मोक्षाय नो भवेत।।

योगशिखेपनिषदि महादेवेन ब्रहमाणं प्रति दिव्यज्ञानोपदेशः द्रष्टव्य-

योगहीनं कथं ज्ञानं मोक्षदं भवतीह भोः।

योगोऽपि ज्ञानहीनस्तु न क्षमो मोक्षकर्मणि।।

तस्माज्ज्ञानं च योगं च मुमुक्षुद्दढ़मभ्यसेत्।

ज्ञानस्वरूपमेवादौ ज्ञेयं ज्ञानैकसाध्नम्।।

योगशास्त्रास्यावश्यक्ता मोक्षप्राप्त्यर्थं भवति खलु। अष्टांगयोगस्य महत्वं समाध्लिाभार्थं तथा च चित्तवृत्तीनां निरोधर्थं भवति। योगशात्रां तु प्रयोगसिsब्रहमविद्या अस्ति। भारतीयसाध्नापsतौ योगस्य सर्वाध्किं महत्वमस्ति। यथा हि चिकित्साशास्त्रां रोगः, रोगहेतुः, आरोग्यं, भैषज्यमिति। चतुर्व्यूहव्युत्पादनपरं, तद्वदेव इदमपि भवरोगचिकित्साशास्त्रारूपं योगशास्त्रां हेय हेयहेतुः, विवेकख्यातिरविप्लवा हानोपायः, विवेकख्यातौ च सत्यां अविद्यानिवृत्तिः, तन्निवृत्तौ आत्यन्तिको द्रष्टृद्दयसंयोगपरमोहानम्, तदेव च कैवल्यम्। अनेन प्रकारेण सर्वेषां जनानां कृते योगदर्शनस्योपादेयता अस्ति।